Journal of Advances and Scholarly Researches in Allied Education

Vol. V, Issue No. IX, January-2013, ISSN 2230-7540

AN INTERNATIONALLY INDEXED PEER REVIEWED & REFEREED JOURNAL

REVIEW ARTICLE

# वेदोपनिषत्पुराणेषु मानवेतरसृष्टिपरम्परा

www.ignited.in

Journal of Advances and Scholarly Researches in Allied Education
Vol. V, Issue No. IX, January-2013, ISSN 2230-7540

# वेदोपनिषत्पुराणेषु मानवेतरसृष्टिपरम्परा

**Maya Yadav***

Lecturer (Sanskrit) Govt. Sr. Sec School, Nahar, Haryana

---------------------------------x---------------------------------

मानवेतरप्राणिनो विना मनुष्य-जीवन-कल्पना-सम्भव-प्रायैव विद्यते। मानवेतरप्राणिनो मनुष्याश्चान्योन्याश्रितास्सन्तः एकस्मिन्नेव सूत्रे आबद्धास्सन्तस्तिष्ठन्तीति निश्चप्रचम्। कारणमेतदेव यत् मानवेतरप्राणिनाञ्चेयं विविधाद्भुत्-सृष्टिरचना परम्परां सम्प्राप्य निर्बाधगत्या प्रवहमाना दरिदृश्यते।यथा-

**ऋग्वेदे-**

विद्यते सर्वविदितं भारतीयसाहित्ये सर्वप्राचीनतम-ग्रन्थत्वं ऋग्वेदस्य। जातञ्चास्मिन्नेव वेदे सर्वादौ मानवेतर-प्राणि-चिन्तनम्।तद्यथा-महर्षेः बृहस्पतेः गावः गोप्यन्ते खलु केनापि बलनामकेनासुरेणापहृत्य क्वापि। तत्क्षणमेव गवामन्वेषणाय सरमानाम्नीं कुक्कुरीं प्रेषयति राजेन्द्रः।नदीमुत्तीर्य सरमा बलपुर-नामकं स्थानं प्राप्य गुप्तस्थाने गोपितानां सर्वांश्च गारन्विष्य तत्र स्थितान् पणिजनान् सम्बोधयन्ती ब्रूते यदहमत्रैन्द्रदूतीरूपेणोपस्थितास्मि समक्षन्ते। ग्रहीतुकामा वर्त्तेऽहं सत्यं गोधनञ्च ते। जलादावश्यमेव भीतासमहं मार्गे, तथापि जलद्वारैव रक्षिता भूत्वा भवत्समक्षं समागता। यथा -

**इन्द्रस्य दूतीरिषिता चरामि मह इच्छन्ती पणयो निधीन्वः।**

**अतिष्कदो भियसा तन्न आवत्तथा रसाया अतरं पयांसि।।**

(ऋ.वे.10/108/012)

अत्राप्सरसः उर्वश्याः वर्णनं कृतं विद्यते,या च स्व लावण्यरूपसौन्दर्येण पुरुरवामाकर्षयति।

**यजुर्वेदः-**

वेदेऽस्मिन् विष्णु-रुद्र-लक्ष्मी-सरस्वती-जल-पितृ-प्रजापति-बृहस्पत्यश्विनीकुमार-यम-पृथ्वी-सूर्य-मरुद्गणाग्निवरुणकेतु-सुरासुरादीनां वर्णनमवाप्यते। दुर्वाञ्चात्र सम्बोध्योक्तं वर्त्तते यद् भोः दुर्वे! यथा त्वं स्वावयवैः ग्रन्थिभिश्च निमित्तैरङ्कुरैर्विस्तृता जयसे तथैवास्माकमपि पुत्रपौत्रादीनामैश्वर्याभिवृद्धिं कुरु यथा

**काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि।**

**एवा नो दूर्वे प्रतनु सहस्त्रेण शतेन च ।।**

य.वे.13/20/107

अत्र स्व सामर्थ्येन शत्रोः संहारकस्य शत्रुं प्रति दयारहितस्याजेयस्य शत्रुजितेन्द्रियस्य प्रार्थना विहिता वर्त्तते,यत् सः स्वसेनायाः सेनापतिर्भूत्वा तेषां कुशलतया रक्षां कुर्यादिति।

**अभिगोत्राणि सहसा गाहमानोदयो वीरः शतमन्युरिन्द्रः।**

**दुश्च्यवनः पृतनाषाडयुद्धोऽस्माकं सेना अवतु प्र युत्सु ।।**

सा.वे. 6/4/3

**सामवेदः-**

वदेऽस्मिन्निन्द्रेन्द्राणी-विष्णु-ब्रहमाशंभूमास्कन्द-गणपति-दुर्गा-यम-काल-चित्रगुप्त-प्रजापत्यश्विनी-कुमार-

सूर्यभौमवरुण-पृथ्वी-वायु-मरुद्गणराक्षस-पितृसर्पादीनां वर्णनमवाप्यते। अत्र सोमं सम्बोधयन्नुक्तं

वर्त्तते यत् भोः सोम! सन्ततेरस्माकमस्मत्कृतेऽपि सहस्त्रप्रकारकान्नसम्पदश्च दद्यादिति।

**इषं तोकाय वो दधदस्मभ्यं सोम विश्वतः।**

**आ पवस्व सहस्त्रिणम्।**

(सा.वे.6/4/3)

इत्थमग्निञ्च प्रार्थयन्नोक्तं विद्यते यत् भोः अग्ने पापिनः चौरस्य दुःखदस्य शत्रोः नाशनं विधायास्माकं मंगलं कुर्यादिति

**आप त्यं वृजिनरिपुंस्तेनमग्ने दुराध्यम्।**

**दविष्टमस्य सत्पते कृधी सुगम ।।**

(सा.वे.11/9/105)

**अथर्ववेदः–**

वेदेस्मिन् रूद्रवस्वादित्याग्निमाध्यमेन सुखमवाप्तये, महर्षिगण-देवता-बृहस्पति-माध्यमेन च शान्तिं प्राप्तये प्रार्थना विहिता वर्त्तते।

**शं रूद्राः शं वसवः शमादित्याः शमग्नयः।**

**शं नो महर्षयो देवाः शं देवाः शं बृहस्पतयः।।**

(अ.वे.19/9/11)

अत्रातीव स्पष्टतयोक्तं वर्त्तते यदहं गन्धर्वानप्सरसस्सर्पान्देवान्पितृन्दृष्टादृष्टान्पदार्थान्प्राप्नोमि येन च सेनानायाः हननं भवेदिति।

**गन्धर्वानप्सरसः सर्पान् देवान् पुण्यजनान्पितृन्।**

**दृष्टादृष्टानीष्णामि यथा सेनाममूं हनन्।।**

(अ.वे.8/8/15)

**मुण्डकोपनिषद्---**

अस्त्युपनिषदियमथर्ववेदीय-शौनकी-शाखान्तर्गता। प्रारम्भेऽस्याः शान्तिपाठेन ऋषिः देवताः प्रार्थयमानो निगदति यत् यस्य सुयशः सर्वत्र व्याप्तं वर्त्तते स सर्वज्ञो देवराजेन्द्रः अरिष्टनिवारकः गरुडस्वामी बुद्धि-विधातृ-बृहस्पतिरिवास्माकं कल्याणं पोषणञ्च कुर्यादिति।

**स्वस्ति न इन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।**

**स्वस्ति नस्ताक्ष्यो अरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु।।**

(मु.उ.शा.पा.210)

**कठोपनिषद्---**

इयञ्चोपनिषद् बलनचिकेतसो यमराजस्य च मध्ये वार्तालापमुद्दिश्य निर्मिता वर्त्तते। नचिकेताः जराः जीर्णाश्च गाः दानस्वरूपेण ददतं पितरमृषिमुद्दालकं दृष्ट्वा पृच्छति यत् भोः! पितः! मां त्वं कस्मै अर्पयसि? प्रश्नाच्छुब्धः पिता त्वां यमराजाय ददामीति पुत्राय उक्तवान्। फलतः नचिकेताः यमलोकं प्राप्य यमराजेन सह वार्तालापं विदधाति। तस्मात् प्रसन्नो भूत्वा तस्य सत्यतां निर्भयताञ्च दृष्ट्वा यमराजः नचिकेतसे अमरत्वमात्मज्ञानञ्चार्पयति। इत्थं नचिकेताः सम्पूर्णाः विद्याः योगविधिञ्च प्राप्य सर्वथा विशुद्धो भूत्वा परब्रह्मपरमात्मानमवाप्नोति। अन्यः कश्चिदप्यस्या आत्मविद्यायाः यथार्थज्ञानं प्राप्नोति चेत्तदा सः दन्ममृत्युचक्रान्मुक्तो भूत्वा परब्रह्मपरमात्मानं प्राप्नोतीति निश्चप्रचम्।

**मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिञ्च कृत्स्नम्।**

**ब्रह्मप्राप्तो विरजोऽभूद्विमृत्युरन्योऽप्येवं यो विदध्यात्ममेव।।**

(क.उ.3/18)

**केनोपनिषद्---**

अस्याञ्चोपनिषदि देवतागर्वहरणाय स्वयं भगवान् यक्षरूपेण प्रकटितो भवति। देवताश्च तं विचित्रं महाकायं यक्षं दृष्ट्वा आश्चर्यचकिताः जायन्ते। तस्य परिचयमवाप्तुकामाः देवताः तत्पार्श्वे अग्निं प्रेषयन्ति। तस्य निकटमग्निश्च स्व परिचयं दददवदति यदहमग्निर्ममगौरवमयं रहस्यपूर्णं नाम जातवेदा हि वर्त्तते।

**तदभ्यद्रवत् तमभ्यवदत् कोसीत्याग्निर्वा ।**

**अहमस्मीत्यब्रवीज्जातवेदा वा अहमस्मीति ।।**

(के.उ.3/4)

इत्थं यक्षः अग्निं पुरतः एकां शुष्कदुर्वां स्थापयति। अग्निश्च स्व सम्पूर्णां शक्तिञ्च संयोज्य ज्वालयितुं प्रयतते। ततः लज्जया नतमस्तको भवति अग्निः।पुनः देवताः एतत्कार्याय वायुदेवं नियोजयन्ति।

**ऐतरेयोपनिषद्–**

अस्याञ्चोपनिषदि अग्नि-वरुणवायु-सूर्यचन्द्राश्विनीकुमार-मृत्युदेवतादिदेवानां वर्णनं प्राप्यते। अत्र बुभुक्षा पिपासा च

स्वेश्वरं पृच्छतः यत् त्वयान्यदेवताभ्यः निवासव्यवस्था सुनिश्चिता। अत एव मत्कृतेपि कस्यापि स्थानविशेषस्य व्यवस्था कर्त्तव्या। तदा परमात्मनोक्तं यदिदानीमेवाहमुभयोः कृते स्थानं यच्छामि। अद्यारभ्य देवतानामाहारेष्वुभयोरपि भागो भविष्यति।

**तमशनायापिपासे अब्रूतामावाभ्यामभिप्रजानाहीति।**

**ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति।।**

(ए.उ.1/3/5)

**शतपथब्राह्मणम्---**

ब्राह्मणेऽस्मिन्नुर्वशीपुरुरवसोः परिचयस्य गन्धर्वाणां वञ्चनाकारणात्तयोःवियोगवर्णनमवाप्यते । उर्वश्यामन्तर्धानायां सत्यां पुरुवा उद्विग्नो भूत्वान्वेषणरतो भवति। तेन च सा कमलाकार्णैः एकस्मिञ्जलाशये अप्सराभिस्सह जलपत्तिरिव तरन्ती दृश्यते। अन्ततः पुरुरवसः प्रार्थनया द्रवीभूय सा वर्षैकं यावत् तेन सह स्थातुं वचनबद्धा भवति।

**वाल्मिकीयरामायणम्–**

महाकाव्येस्मिन् मर्कट-रीक्ष-देवता-ग्निराक्षसश्वाननागसमुद्रपृथ्वी-पर्वत-पुष्प-विमान-गरुड-काक-गृद्धादीनाञ्चित्रणं कृतमस्ति। पञ्चवट्यां सीतापहरणानन्तरं विरहव्यथितरामः सातायाः सङ्केतं पृच्छति,परन्तु दुरात्मनः रावणस्य रूपकर्मस्मरणभिया गोदावरी वैदेहीविषये किञ्चिदपि नैव भणति।

**रावणस्यच तद्रूपं कर्मापि च दुरात्मनः।**

**ध्यात्वा भयात् तु वैदेहीं सा नदी न शशंस ह।।**

(वा.र.64/9)

रामश्च यदा मृगान्प्रति सीतायाः विषये पृछति तदा मृगाः सहसोत्त्थायोपरि पश्यन्त आकाशमार्गं प्रति संकेतयन्तस्सर्वे दक्षिणदिशां प्रति मुखं निधाय धावन्ति–

**एवमुक्त्वा नरेन्द्रेण ते मृगाः सहसोत्थिताः।**

**दक्षिणाभिमुखाः सर्वे दर्शयन्तो नभः स्थलम्।।**

(वा.रा.अ.का.64/17)

इत्थं मृगसंकेतो दक्षिणदिशां प्रत्याकाशमार्गञ्च प्रति भवति।

**महाभारतम्–**

कलेवरो महाभारतस्यातीव बृहत्तमो वर्त्ततेति सुविदितमेव।अतःअत्र मानवेतरप्राणिनां चित्रणस्य बाहुल्यं दरीदृश्यते सर्वत्र।अत्र सुरासुर-गन्धर्व-कुबेर-दिक्पाल-यम-राजाप्सरोगरुडसर्पपितृदेवताशक्र-

-मृत्युकालादीनां चित्रणं प्राप्यते। प्रसंगेऽस्मिन् भगवान् शेषनागः घोरतप आचरति।पद्मनाभ- नामकस्य नागस्य भार्यातिथिसत्कारं विदधाति। सर्पस्वरूपधृतनहुषः युधिष्ठिरं प्रति प्रश्नोत्तरं करोति।

वकरूपेण यक्षः युधिष्ठिरं प्रति प्रश्नान् ब्रूते, शकुन्तः ऋषिकण्वं प्रति शकुन्तलारक्षणाय प्रार्थयति। मानसरोवरनिवासिनः हंसस्य रूपं धृत्वा महर्षिः शरशय्यायाः उपरि शयितस्य भीष्मपितामहस्य दर्शनाय समागतः।राजधर्मनामको वकः गौतम-नामकस्य मानवस्यातिथ्यमङ्गीकरोति। श्येनजातेरन्यजातेश्च पक्षिणः जाजलिं मुनिं धर्मोपदेशं कुर्वन्ति। पूजनीनामकः पक्षी सर्वज्ञः सम्पूर्णतत्त्वज्ञाता च वर्त्तते।स च राज्ञा ब्रह्मदत्तेन सह वार्त्तालापं विदधाति। श्येनकपोतादयः पक्षिणः शिविनामकेन राज्ञा सार्धं वार्त्ता कुरुते।

अत्र मूषकमार्जारयोःवार्त्तालापः नीतिपरकज्ञानेन परिपूर्णो वर्त्तते। मंत्री शृगालः राजानं सिंहमुपदिशत्यत्र नीतिशास्त्रम्। उष्ट्रश्च तपसः प्रभावाद् ब्रह्मणो वरमवाप्नोति। सूर्यो युधिष्ठिरायान्नप्राप्तयायक्षयपात्रमर्पयति। महर्षेः भृगोरग्निना सह,नारदस्य वायुना सह, अन्यदेवानां समलवृक्षेण सह संवादो भवति।स्त्रीरूपधृतमृत्योः ब्रह्मणः समुद्रस्य सरितानाञ्च परस्परं वारत्तालापो भवति। नकुलः राज्ञः युधिष्ठिरस्य यज्ञे एकत्रितान् सर्वान्नेव राज्ञः प्रति कथयति यत् भोः राजानः! युष्माकमश्वमेधयज्ञः कुरुक्षेत्रनिवासिनः कस्यचिदप्येकस्योच्छवृत्ति- धारिणः उदारब्राह्मणस्य प्रस्थात्मकसक्तुदानमिवापि नास्ति।

**सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो नराधिपाः।**

**उच्छवृत्तेवदानस्य कुरुक्षेत्रनिवासिनः।।**

(म.भ.उ.प.6/90/7)

**श्रीमद्भगवद्गीता–**

अत्र रुद्रादित्यवसुसाध्यगणविश्वेदेवाश्विनीकुमारमरूद्गणपितृगन्धर्व यक्षराक्षसादिसिद्धसमुदायस्य वर्णनं प्राचुर्येण प्राप्यते। यत्रार्जुनो विस्मितो भूत्वा भगवतः श्रीकृष्णस्य विराट्स्वरूपस्यावलोकनं करोति।

**रुद्रादित्या वसवो ये च साध्या विश्वेश्विनौ मरुतश्चोष्मपाश्च।**

**गन्धर्वयक्षासुरसिद्धसंघा वीक्षन्ते त्वां विस्मिताश्चैव सर्वे।।**

(भ.गी.11/22)

**श्रीमद्भागवतमहापुराणम्---**

महापुराणेऽस्मिन् कलियुग-यमराज-यमदूत-राक्षस-प्रेत-पितृ-देवतेन्द्रशिव-ब्रह्म-सनकादीनां कलियानाग-वासुकी-गन्धर्व-यक्ष-किन्नर-किम्पुरुष-भगवत्पार्षद-वैतालिकादीनां सम्यक्चित्रणं कृतं वर्त्तते। अत्र भक्तिः स्त्रीरूपेण ज्ञानवैराग्ये च पुत्ररूपेण, धर्मः वृषभरूपेण,पृथ्वी गोरूपेण प्रकटिताः भवन्ति। स्वयं साक्षादीश्वरश्च बंसरूपेण सनकादिभ्यः ज्ञानोपदेशं प्रदाय तेषां जिज्ञासोपशमनं विधत्ते। गजेन्द्र-मोक्षप्रसङ्गे गजः स्वप्राण-संकट-मवलोक्य स्वकरे(शुण्डे) पङ्कजं गृहीत्वात्यन्तमेव विह्वलो भूत्वा भगवन्तं प्रार्थयति ।यत् नारायण! जगद्गुरो! नमस्तुभ्यं नमस्तुभ्यम्।

**उत्क्षिप्य साम्बुजकरंगिरमाह कृच्छ्रान्नारायणाखिलगुरो भगवन्नमस्ते।**

(भा.पु.8/3/32)

विरहव्यथितगोप्यः भ्रमरान्सम्बोधयन्त्यः स्वविरहवेदनाः प्रकटयन्ति। ताः वृक्ष-लता-पुष्प-मृगान्प्रति श्रीकृष्णस्य कुशलक्षेमं सङ्केतञ्च पृच्छन्ति। हंसस्य स्वागतं विधाय तस्मै आसनं प्रदाय दुग्धपानादिकं सम्पाद्य श्रीकृष्णविषये परिपृच्छन्ति। यथा-

**हंस स्वागतमास्यतां पिब पयो ब्रूह्यङ्गशौरेः कथा।**

(भा.पु.10/90/24)

**विष्णुपुराणम्–**

पुराणेस्मिन्निन्द्रब्रह्म-देवता-लक्ष्मी-नारद-यम-राजाप्सराग्नि-पृथ्वी-राक्षस-दैत्य-नागरावासुकी-तक्षक- कालियादीनां वर्णनं कृतमस्ति। राजेन्द्रः मेघनादिशति,यस्य च ते पालनं कुर्वन्ति। यमुना बलरामस्यादेशं पालयति। देवताः वायुं दूतरूपेण प्रेषयन्ति। वायुश्चैकान्ते श्रीकृष्णं प्रणम्य निवेदयति,यत् मां देवताः प्रेषितवन्तः। यथा-

**देवतैश्च प्रहितो वायुः प्रणिपत्य केशवम्।**

**रहस्येवमहं दूतः प्रहितो भगवन्सुरैः।।**

(वि.पु.37/16)

यदा श्रीकृष्णबलरामौ च गुरोः सान्दीपनेः पुत्रमन्वेष्टुं समुद्रसकाशमयातः तदा सागरोऽर्घ्यं गृहीत्वा तत्समीपमुपस्थितो भूत्वा वदति यदहं गुरोः पुत्रहरणं नाकरवम्।

**गृहीतास्त्रौ ततस्तौ तु सर्घ्यहस्तो महोदधिः।**

**उवाच न मया पुत्रो हृतस्सान्दीपनेरिति।।**

(वि.पु.5/21/26)

**मत्स्यपुराणम्---**

अत्र मत्स्य राज्ञा मनुना युगान्त-प्रलय-स्वरूपं ज्ञापयता उच्यते यत् पर्वतवनकानन-सहिता सम्पूर्णा पृथ्वी जलमग्ना भविष्यति। स च स्वेदजाण्डजोद्भिज्जजरायुजादि-सम्पूर्ण-जीवानां रक्षा-मार्गमपि ज्ञापयति। चन्द्रश्च बृहस्पतेः भार्यामपहरति। शिवश्च तां मोचयितुं चन्द्रेण सह युद्धं कुरुते। फलतः चन्द्रेण सा परावर्त्यते शीघ्रम्। प्रचेतसा नन्देन सप्तविंशति-नक्षत्रात्मिकाः कन्याः चन्द्रमसे भार्यात्वेन प्रदीयन्ते। धर्मार्थकाममोक्षाः पुरुरवसः सम्मुखमुपस्थिताश्च भूत्वास्मत्सु श्रेष्ठ कः इति ज्ञापयितुमनुरुध्नन्ति। अत्र कीटदम्पतेः प्रेमालापस्य मनोहरं वर्णनं कृतं विद्यते। कामेन विदग्धः कीटः पिपीलिकां प्रति गद्गदवचनैरनुनयं विनयञ्च करोति। यथा–

**पिपीलिकामनुनयन् परितः कीटकामुकः।**

**पञ्चबाणाभितप्ताङ्ग सगद्गदमुवाच ह।।**

(म.पु.20/29)

**देवीभागवतम्---**

देवासुरसंग्रामे महिषासुरात्पराजितानां देवानां स्तुतौ ब्रह्माविष्णुमहेशादीनां तत्त्वतेजसः महाशक्ति-स्वरूपिणी महिसासुर-मर्दिनी देवी प्रकटिताभवत्। अस्य वाहनं

www.ignited.in

वनराजसिंहः आसीत्। एतस्यै देव्यै भगवता शिवेन त्रिशूलम्,विष्णुना चक्रम्,अग्निना शक्तिम्, वायुना धनुर्बाणयुक्तं तुरीयम्,इन्द्रेण वज्रम् घण्टाञ्च,यमेन दण्डम्,वरुणेन पाशम्,प्रजापतिना स्फटिकाक्षमालाम्, विश्वकर्मणा परशुमभेद्यकवचञ्च, ब्रह्मणा कमण्डलुम्,हिमालयेन सिंहम्, कुबेरेण मधुपात्रम्, शेषनागेन च बहुमूल्यं नाग-हारमुपहाररूपेण प्रदाय देवीयमेतदलङ्कारैरलंकृता। इत्थं देवी विविधायुध-वस्त्राभूषणैस्सुसज्जिता भूत्वा महिषासुरेण साकं युद्धञ्चकार।

एतदतिरिक्तमन्येष्वपि पुराणेषु मानवेतरप्राणिनां समावेशो प्राप्यते। यथा भागवतस्य रासपञ्चाध्याय्यां विरहव्यथितगोप्यः पृथ्वी-हिरण-मालती-चमेली-जाती-जूहीत्यादि-पुष्पाणि प्रति रसाल-प्रियालाश्वत्त्थजम्बू-पनसादिवृक्षान्प्रत्यपि श्रीकृष्णविषये परिपृच्छन्ति। ताश्च तुलसीं सम्बोधयन्त्यः ब्रूवते यत्- भगिनि तुलसि! त्वं सर्वकल्याणदात्री वर्त्तसे। भगवच्छ्रीकृष्णस्य चरणारविन्दे सर्वदा रता तिष्ठसि।अत एव तु श्रीकृष्णः भ्रराविष्टतुलसीस्रक् हृदयपटले स्थापयति। किं त्वया प्रियतमाच्युतः कुत्राप्यत्र दृष्टो वा?

**कच्चित्तुलसी कल्याणि गोविन्दचरणप्रिये।**

**सह त्वालिकुलैर्बिभ्रद् दृष्टस्तेऽतेतिप्रियऽच्युतः।।**

(रा.प. 2/7)

इत्थं न केवलं मानवैरीश्वरैर्वापितु पशुपक्षीसरीसृपादयः मानवेतरसृष्टयोऽपि जगत्कल्याणाय सम्वर्धनाय संरक्षणाय चमानवाः इव देवानां राज्ञां किमधिकं मानवानाञ्चापि साहाय्यं विहितवन्तः । इत्थं वेदोपनिषत्पुराणेषु मानवेतरप्राणिनां सृष्टेःकाचिदेका सुदृढा सुविशाला सुप्राचीनतमा परम्परा विद्यते

**इति शम्**

---

**Corresponding Author**

**Maya Yadav***

Lecturer (Sanskrit) Govt. Sr. Sec School, Nahar, Haryana

**E-Mail –**